# श्रीकृष्णोपनिषत्

श्रीमहाविष्णुं सच्चिदानन्दलक्षणं रामचन्द्रं दृष्ट्वा सर्वाङ्गसुन्दरं मुनयो वनवासिनो विस्मिता बभूवुः । तं होचुर्नो ऽवद्यमवतारान्वै गण्यन्ते आलिङ्गामो भवन्तमिति । भवान्तरे कृष्णावतारे यूयं गोपिका भूत्वा मामालिङ्गथ । अन्ये ये ऽवतारास्ते हि गोपा नः स्त्रीश्च (नो) कुरु ।

अन्योन्यविग्रहं धार्यं तवाङ्गस्पर्शनादिह ।
शश्वत्स्पर्शयितास्माकं गृह्णामो ऽवतरा वयम् ॥ 1 ॥
रुद्रादीनां वचः श्रुत्वा प्रोवाच भगवान्स्वयम् ।
अङ्गसङ्गं करिष्यामि भवद्वाक्यं करोम्यहम् ॥ 2 ॥
मोदितास्ते सुराः सर्वे कृतकृत्याधुना वयम् ।
यो नन्दः परमानन्दो यशोदा मौक्तिगेहिनी ॥ 3 ॥
माया सा त्रिविधा प्रोक्ता सत्त्वराजसतामसी ।
प्रोक्ता च सात्विकी रुद्रे भक्ते ब्रह्मणि राजसी ॥ 4 ॥
तामसी दैत्यपक्षेषु माया त्रेधा ह्युदाहृता ।
अजया वैष्णवी माया जप्येन च सुता पुरा ॥ 5 ॥
देवकी ब्रह्मपुत्रा सा या वेदैरुपगीयते ।
निगमो वसुदेवो यो वेदार्थः कृष्णरामयोः ॥ 6 ॥
स्तुवन्ति सततं यस्तु सो ऽवतीर्णो महीतले ।
वने वृन्दावने क्रीडन्गोपगोपीसुरैः सह ॥ 7 ॥
गोप्यो गाव ऋचस्तस्य यष्टिका कमलासनः ।
वंशस्तु भगवान्रुद्रः शृङ्गमिन्द्रः स्वघो ऽसुरः ॥ 8 ॥
गोकुलं वनवैकुण्ठं तापसास्तत्र ते द्रुमाः ।
लोभक्रोधादयो दैत्याः कलिकालस्तिरस्कृतः ॥ 9 ॥
गोपरूपो हरिः साक्षान्मायाविग्रहधारणः ।

दुर्बोधं कुहकं तस्य मायया मोहितं जगत् ॥ 10 ॥
दुर्जया सा सुरैः सर्वैर्धृष्टिरूपो भवेद्द्विजः ।
रुद्रो येन कृतो वंशस्तस्य माया जगत्कथम् ॥ 11 ॥
बलं ज्ञानं सुराणां वै तेषां ज्ञानं हृतं क्षणात् ।
शेषनागो भवेद्रामः कृष्णो ब्रह्मैव शाश्वतम् ॥ 12 ॥
अष्टावष्टसहस्रे द्वे शताधिक्याः स्त्रियस्तथा ।
ऋचोपनिषदस्ता वै ब्रह्मरूपा ऋचः स्त्रियः ॥ 13 ॥
द्वेषश्चाणूरमल्लो ऽयं मत्सरो मुष्टिको जयः ।
दर्पः कुवलयापीडो गर्वो रक्षः खगो बकः ॥ 14 ॥
दया सा रोहिणी माता सत्यभामा धरेति वै ।
अघासुरो महाव्याधिः कलिः कंसः स भूपतिः ॥ 15 ॥
शमो मित्रः सुदामा च सत्याक्रूरोद्धवो दमः ।
यः शङ्खः स स्वयं विष्णुर्लक्ष्मीरूपो व्यवस्थितः ॥ 16 ॥
दुग्धसिन्धौ समुत्पन्नो मेघघोषस्तु स स्मृतः ।
दुग्धोदधिः कृतस्तेन भग्नभाण्डो दधिग्रहे ॥ 17 ॥
क्रीडते बालको भूत्वा पूर्ववत् सुमहोदधौ ।
संहारार्थं च शत्रूणां रक्षणाय च संस्थितः ॥ 18 ॥
कृपार्थे सर्वभूतानां गोप्तारं धर्ममात्मजम् ।
यत्सृष्टमीश्वरेणासीत्तच्चक्रं ब्रह्मरूपधृक् ॥ 19 ॥
जयन्तीसम्भवो वायुश्चमरो धर्मसञ्ज्ञितः ।
यस्यासौ ज्वलनाभासः खड्गरूपो महेश्वरः ॥ 20 ॥
कश्यपोलूखलः ख्यातो रज्जुर्मातादितिस्तथा ।
चक्रं शङ्खं च संसिद्धिं बिन्दुं च सर्वमूर्ध्नि ॥ 21 ॥
यावन्ती देवरूपाणि वदन्ति विबुधा जनाः ।
नमन्ति देवरूपेभ्य एवमादि न संशयः ॥ 22 ॥

गदा च कालिका साक्षात्सर्वशत्रुनिबर्हिणी ।
धनुः शार्ङ्गं स्वमाया च शरत्कालः सुभोजनः ॥ 23 ॥
अब्जकाण्डं जगद्बीजं धृतं पाणौ स्वलीलया ।
गरुडो वटभाण्डीरः सुदामा नारदो मुनिः ॥ 24 ॥
वृन्दा भक्तिः क्रिया बुद्धिः सर्वजन्तुप्रकाशिनी ।
तस्मान्न भिन्नं नाभिन्नमाभिर्भिन्नो न वै विभुः ॥ 25 ॥
भूमावुत्तारितं सर्वं वैकुण्ठं स्वर्गवासिनाम् ॥ 26 ॥

इत्युपनिषत् ॥